युष्मांस्तेजस्वी ब्रह्मवर्चसी भूयासं। रुगसि। रुचं मयि धेहि। मयि रुक्। दत्रा पु
रस्ताद्रोचसे। दत्रा दक्षिणा। दत्रा प्रत्यङ्। दत्रोदङ्। दत्रो ध्वौ भासि सुमनस्यमा ॥२७॥
नः सनः सम्राडिषमूर्जं धेहि। वाजी वाजिने पवस्व। रोचितो घर्मो रुचीय। अ

तु

मस्वतीमित्युक्ते पवित्राण्यूर्ध्वं धारयन्ति। अरूचरुच्यदुषसइत्युक्ते रुचितो घ
र्मइत्युक्ते यथेतं त्रिरपसव्यं परीत्य पवित्राणि निधाय सर्वे घर्ममुपतिष्ठंते। अप
श्यं गोपामनिपद्यमानं। आ च परा च पथिभिश्चरंतं॥ स सध्रीचीः स विषूची
र्वसानः। आ वरीवर्ति भुवनेष्वंतः। अत्र प्रावीः। मधुमाध्वीभ्यां मधुमाधूची
भ्यां। अनु वां देववीतये। समग्निरग्निना गत। सं दैवेन सवित्रा। सं सूर्येण
रोचते। स्वाहा समग्निस्तपसा गत। सं दैवेन सवित्रा। सं सूर्येणारोचिष्ट।
धर्ता दिवो विभासि रजसः। पृथिव्या धर्ता। उरोरंतरिक्षस्य धर्ता। धर्ता दे
वो देवानां। अमर्त्यस्तपोजाः। हृदे त्वा मनसे त्वा। दिवे त्वा सूर्याय त्वा। ऊर्ध्वो
मिमध्वरं कृधि। दिवि देवेषु होत्रा यच्छ। विश्वासां भुवां पते विश्वस्य भुवनस्प
ते। विश्वस्य मनसस्पते। विश्वस्य वचसस्पते। विश्वस्य तपसस्पते। वि
श्वस्य ब्रह्मणस्पते। देवश्रुत्त्वं देव घर्म देवान्पाहि। तपोजां वाचमस्मे नियच्छ
देवायुवं। गर्भो देवानां। पिता मतीनां। पतिः प्रजानां। मतिः कवीनां। सं देवो दे
वेन सवित्रायतिष्ट। सं सूर्येणारुक्त। आयुर्दास्त्वमस्मभ्यं घर्म वर्चोदा अ

५८

अपराह्णिकेतुनाग्निर्ज्योतिः केतुनाजुष० णांस्वाहा। ज्योतिषइदं०

सिपितानोसिपितानोबोध। आयुर्दास्त्वंतनूधाः पयोधाः। वर्चोदा वरिवोदा द्रविणो
दाः। अंतरिक्षप्रा उरोर्वरीयान्॥ अशीमहित्वामामाहिंसीः। यजमानो गार्हपत्यमु
पतिष्ठते। त्वमग्ने गृहपतिर्विशामसि॥ विश्वासां मानुषीणां॥ शतं पूर्भिर्यविष्ठ पाह्यं
हसः। समेद्धारं शतं हिमाः। तं द्रविणं हार्दिवानां। इहैव रातयः संतु। प्रतिप्रस्था
तावेदं पत्न्यै प्रदत्त्वा वाचयति। वर्ष्मीमतीतेसपेयं सुरेतोरेतो दधानावीरं विदेयत
व संदृशि माहं रायस्पोषेण वियोषं। आहवनीये दक्षिणं रौहिणं जुहोति। अहर्ज्यो
तिः केतुना जुषतां सुज्योतिर्ज्योतिषां स्वाहा। ज्योतिषइदं०। अध्वर्युर्देवस्यत्वेति रश्म
नामादाय देवस्य त्वेत्यभिमंत्र्य प्रतिप्रस्थाता कंसं पिन्वने चादाय जघनेन होतारं
गच्छेत्। अध्वर्युरंतःशालं तिष्ठन् घर्मदुघां त्रिरुपांश्वाह्वयति। इड एहि। अदित एहि। स
रस्वत्येहि। दक्षिणायां द्वारि अपनिष्क्रम्य त्रिरुच्चैः। गंगाए ३ त्रिहि। तां रश्मनया बध्नाति।
अदित्या उष्णीषमसि। वत्समभिमृशति। वायुरस्यैडः। मुंचति। पूषासि उपावसृज अश्वि
भ्यां प्रदापय। स्तनमभिमंत्रयते। यस्ते स्तनः ०वैकः। प्रस्तुतायां वत्समपनयति।
उत्स्र घर्मं शिंषोत्स्र घर्मं पाहि घर्माय शिंक्ष्व। गां नियुज्योपसीदति। बृहस्पतिस्त्वो
पसीदतु। स्तनान्संमृशति। दानवस्थ पेरवो विष्वग्वृतो लोहितेन। आदत्ते

॥२२॥

अदितेस्ना ... स्नासी८

॥२३॥

(37)

रियसूक्ते पिन्वनेदोहयति॥ अश्विभ्यां पिन्वस्व। अतिशिष्टं कंसो प्रति। सरस्वत्यै पिन्वस्व पूष्णे पिन्वस्व बृहस्पतये पिन्वस्वेंद्राय पिन्वस्व। अतिशिष्टं कंसो प्रतिप्रस्थाता तस्मीं पिन्वने छागां उ तिष्ठ ब्रह्मणस्पत इ सूक्ते। अध्वर्युः प्रतिप्रस्थात्रे पयसी प्रदाय यथेतमेय शफोपयमानादत्ते। गायत्रोसि। प्रथमं। त्रैष्टुभोसि। द्वितीयं। जागतमसि। तृतीयं उपद्रवसूक्ते आ ह्रियमाणे पयसी। अभिमंत्रयते। सहोर्जो भागेनोप मेहींद्राश्विनामधुनः सारघस्य घर्मं पात वसवो यजतावट्। पुरस्तात्प्रत्यङ्मुखस्तत्प विरय्यगा पयोबनयति उपयमनेन। स्वाहा त्वा सूर्यस्य रश्मये वृष्टिवनये जुहोमि स्वाहा। अग्न्याणामन्वीक्षतोम धुहविरसि। सूर्यस्य तपस्तप। प्रतिप्रस्थाता तस्मीं छागापयः। उभयत्रो षमेकीरत्या। अध्वर्युस्तृतीयं। कंसस्थमुपयमने प्रश्नावनीय अंगारान्गार्हपत्ये प्रसत्य महावीरं शफाभ्यां परिगृह्णाति। द्यावापृथिवीभ्यां त्वा परिगृह्णामि। सव्ये कृत्वा मौंजेनवेदेनाधस्तादुपमृज्योपयमनेनोपयच्छति। अंतरिक्षेण त्वोपयच्छामि आदायोत्तिष्ठति देवानां त्वा पितॄणामनुमतो भर्तुं शकेयं। प्रोऽ हरति। तेजोसि। तेजोनु प्रेह्यग्निर्मा पृथिव्याः पातु वायु

पयमनं। पिन्वमेनं सूर्यरश्मये वृष्टिवनयद्दं

58

॥२२॥

रंतरिक्षात्सूर्यो दिवो दिविस्पृशम्मा माहिंसीरंतरिक्षस्पृशम्मा माहिंसीः पृथि
विस्पृशम्मा माहिंसीः सुवरसि सुवर्मे यच्छ दिवं यच्छ दिवो मा पाहि। गच्छन्ने वान
वानं पं चाह। समुद्राय त्वा वाताय स्वाहा सलिलाय त्वा वाताय स्वाहा नाधृष्याय
त्वा वाताय स्वाहा प्रतिधृष्याय त्वा वाताय स्वाहा वस्ये वत्या वाताय स्वाहा एव

नवानं ५

मिवहृत्तरे दुवस्वते त्वा वाताय स्वाहा मिमि दृते त्वा वाताय स्वाहा। यथोपप
दषट्। अग्नये त्वा वसुमते स्वाहा। सोमाय त्वा रुद्रवते स्वाहा। वरुणाय त्वा दि
त्यवते स्वाहा। बृहस्पतये त्वा विश्वदेव्यावते स्वाहा सवित्रे त्व र्भुमते विभुमते
प्रभुमते वाजवते स्वाहा। यमाय त्वांगिरस्वते पितृमते स्वाहा। दक्षिणत आसी

आसीनं

नं ब्रह्माणमीक्षते। विश्वा आशा दक्षिणासत्। पश्चाद्धोतारं। विश्वान्देवान
याडिह। सव्यनास्याकामन्तपति। स्वाहाकृतस्य घर्मस्य मधोः पिबतमश्विना
स्वाहाग्नये यज्ञियाय शं यजुर्भिः। यजमानं वाचयति। अश्विना घर्मं पातं
हार्दिवानमहर्दिवाभिरूतिभिः। अनु वां द्यावापृथिवी मंसातां। तं प्रैरा आ

॥२३॥

व्य प्रत्याश्रावितं। घर्मस्य यज। वषट्कृते जुहोति। स्वाहेंद्राय। अनुवष
ट्कृते। स्वाहेंद्रावट्। इंद्रायेदं। वाचयति। घर्ममपातमश्विना हार्दिवानमह
अग्नयेस्विष्टकृतरं६

र्दिवाभिरूतिभिरनुयां द्यावापृथिवी अमंसातांतंप्राव्यंयथावट् नमोदिवेनमः
पृथिव्येदिविधाइमंयज्ञंयज्ञमिमंदिवियाद्दिवंगच्छांतरिक्षंगच्छपृथिवींग
च्छपंचप्रदिशोगच्छदेवान्घर्मपानाच्छपितृन्घर्मपांगच्छ। प्रतिप्रस्थातापिन्वने
नोपयमनादुपहत्यमहावीरेपूरयित्वाशफाभ्यांगृहीत्वाभावप्यग्नेसहस्राव
यतः प्रतिमंत्रं। इषेपीपिहि ऊर्जेपीपिहि ब्रह्मणेपीपिहि क्षत्रायपीपिहि अद्भ्यः
पीपिहि ओषधीभ्यः पीपिहि वनस्पतिभ्यः पीपिहि द्यावापृथिवीभ्यांपीपिहि सु
भूतायपीपिहि ब्रह्मवर्चसायपीपिहि यजमानायपीपिहि मह्यंज्यैष्ठ्यायपांसु। ज्यैष्ठ्या
यपीपिहि त्र्यंश। अध्वर्युरेवाभिमुखंप्रदक्षिणंप्रागादिषुस्त्रावयति। त्विष्यै
त्वा। द्युम्नायत्वा। इंद्रियायत्वा। भूत्यैत्वा। उपयमनेनमहावीरस्थंपयोवनीयो
दङ्ः साक्रम्यतदंतवेंदिप्रागिबिलेसादयति। प्रतिप्रस्थाताराजतंरुक्ममुद्वास
नीयेखरेउपगूहति। अध्वर्युः तस्मिन्महावीरंसादयति। धर्मासिसुधर्मामेन्य
स्मेब्रह्माणिधारयनेत्वावातस्कंदयात्। औदुंबरशकलेनोपयमनादुपहत्या
हवनीयस्यपूर्वार्धेक्षारयति। पूष्णेशरसेस्वाहा। पूष्णेशरसइदं। तंदंतंस्मि
न्हदेशंमध्यमेपरिधौसादयी। याहुतीयैनोपयमनादुपहसपूर्वार्धेक्षारय

तृतीयेनोपहत्य मध्येप्रश्रोतयति॥ प्रतिरेभ्यः स्वाहा प्रतिरेभ्य इदं तथैव सादयित्वा

॥२४॥

ता ग्रावभ्यः स्वाहा। ग्रावभ्य इदं। तथैव सादयीत्वा चतुर्थेनोपहत्यापरोधे प्रश्नोतयति। द्यावापृथिवीभ्यां स्वाहा। द्यावापृथिवीभ्यामिदं। तदुपरिसिक्तं दैत्रां भस्मांत उपयम्य पंचमेनोपहत्य प्राचीनावीती दक्षिणार्धे क्षारयति। पितृभ्यो घर्मपेभ्यः स्वाहा। पितृभ्यो घर्मपेभ्य इदं॥ अप उपस्पृश्य तत् हिरांजनं दक्षिणे परिधौ सादयीत्वा षष्ठेन महावीर पिन्वनकं सलेपोपयमनेषु संमृज्योत्तरार्धे क्षारयति। रुद्राय रुद्रहोत्रे स्वाहा। रुद्राय रुद्रहोत्र इदं। अप उपस्पृश्य। तदुत्तरेणा तीकाष्ठे नानीक्षमाणो निरस्यते। पाप्मनासहनि रर्थं गच्छ यो स्मान्द्वेष्टि यं च वयं द्विष्मः। अप स्पृष्ट्वा पंच शकलान द्भिः संस्पृश्याहवनीये नु प्रहरति। प्रतिप्रस्थातोत्तरे रोहिणं जुहोति। अहर्ज्योतिः केतुना जुषता सुज्योतिर्ज्योतिषा स्वाहा। ज्योतिष इदं। अपराह्णे तु। रात्रिर्ज्योतिः केतुना जुषतां सु। अध्वर्युः त्रस्त्रिः क्रमेणाग्नीन्परिषिंचति। सत्यं त्वर्त्तेन परिषिंचामि। अपराह्णे केतु। ऋतं त्वा सत्येन परिषिंचामि। उपयमनं गार्हपत्ये नीत्वा पर्यग्नि करोत्यं तरितमिति। संमृशाति। सजर्देवैः प्रातर्यावभिः प्रातर्यावाणो मा देवास्य स्वस्ति संपारयंतु पशुभिः। अपराह्णे केतु। सजूर्देवैः सायंयावभिः सायंयावानो मा देवास्वःस्त्रि। जघनेन गार्हपत्य मुपसादनीय कूर्चे सादयति। नमईशानाय प्रजाः पाहि ग्रावो

नी६

॥२५॥

मिवर्द्धतां महंयजमानोमारिषं। दत्राहोतारं व्याख्याय भूर्भुवः सुवरुर्वंतरिक्षमन्विहस्यं पंथावि
ततोदेवयानाः। येनायंनषयः स्वर्गकामाः स्तेनगच्छानि परमेव्योमन्। यथानेही येयः
सुस्ताः सकान्नात्। प्राग्नुडुपाहवनीयस्य पश्चादुपसादनीयकूर्चेसादयति।
नमईशाना०षं। वैकंकतीसमिधंतस्मीमाधायाभिमन्त्राति। तयोदेवतयांगिरस्वधु
वासिंद। तात्रस्यस०वः। विद्वदसिविधेमेपाप्मानं। अपउपस्तत्रय प्रथमामाहु
तिं जुहोति। भूः स्वाहा अग्नयइदं। आपराह्निकेतु। अपीपरोमाह्ना रात्रियैमापाह्यषी
ति अग्नेसमित्त्यासमिध्यस्वायुर्मेदा वर्चसामोजीः। अग्निर्ज्योतिर्ज्योतिरग्निस्वाहा।
अग्नयइदं। प्रथमामाहूतिंजुहोति। द्वितीयादिपूर्वाह्निकेतु। अपीपरोमारात्रियो
अह्नोमापाह्यषाते अग्नेसमित्त्यासमिध्यस्वायुर्मेदावर्चसामोजी। समिधमाधा
य प्रथमामाहुतिंजुहोति। सूर्योज्योतिर्ज्योतिः सूर्यस्वाहा। सूर्यायेदं०। उपयमनं
सवृदतिवाल्पकूर्चेनिधायप्रदक्षिणमावस्यगार्हपत्यंप्रतीक्षते। उपप्रेतसंग
च्छध्वमाभागिनोभागधेयंप्रमायि। सप्तर्षीणां सुकृतोयत्रलोकस्तत्रेमं
यज्ञंयजमानंचधत्त। समिध्येवंपूर्वाहूतिमतिक्रम्याधिकद्रव्यां प्रयाग्बिल
याकूर्चाद्वितीयां प्रजापतयेस्वाहा। प्रजापतयइदं०। उपयमनंत्रिरति

ओषधीभ्य इदं सायंनि

वाल्यकूर्चे निधाय। ओषधीभ्य इत्योषधीर्जिन्व। कूर्चेततरतः लेपमुन्मार्ष्टि पितृभ्य

॥२६॥ स्यापितृ जिन्वेति। यजमानः। पितृभ्य इदं। प्राचीनावीती। यज्ञोपवीत्य पत्नपरस्परस्य।

अध्वर्युः। उपयमनं होत्रे प्रदाय होत्र ध्वर्युब्रह्म प्रतिप्रस्थात प्रस्तोत्राग्नीध्र यजमानाः क्र

मेण परस्परमुपहूय अवघ्राण भक्षयंति। यजमानो होत्रादीनुपहूय प्रत्यक्षं। हूतः हवि

र्मधुविरिंद्र तमग्नेपितानासिमामाहिंसीरत्र्यामं तदेवयर्मममधुमतो वाजवतः पितु

मतोगिरस्वतः स्वधाविनोऽस्मी माहिंस्याम मामाहिंसीः। उच्छिष्ट खरे आचामंति। आ

ग्नीध्रः उच्छिष्ट खरे उपयमनं प्रक्षाल्याहरति॥ अध्वर्युराहवनियेनिष्टप्याछिः

पूरयित्वोदगुद्धित्राति। सप्तर्षीनश्रीणीहि सप्तर्षीं जिन्व सप्तर्षिभ्यः स्वाहा। सप्तर्षि

भ्य इदं। जघनेन गार्हपत्यं। इदमहमग्नेवैश्वानरे मर्तं जुहोमि स्वाहा। अग्नये

वैश्वानरायेदं। अंतर्वेदि। आक्षियाम क्षितादुतिं जुहोमि स्वाहा। आक्षिय

इदं। पूर्ववत्सारिषिच्यांतर्वेदि प्राकूबिलेउपयमनेरुक्मोमदंतीश्चानीयहि

नी रण्यवर्णा निर्माज्य यित्वा। निनीयाथः आज्यस्थाल्याः स्रुवेणांजुहोति। प्राणा ॥२६॥

यस्वाहा। व्यानायस्वाहा। अपानायस्वाहा। चक्षुषेस्वाहा। श्रोत्रायस्वाहा

प्रतिनंनं प्रायश्चित्तानि

मनसेस्वाहा।वाचेसरस्वत्यैस्वाहापूष्णेस्वाहा।पूष्णेऽऽरसेस्वाहा।पूष्णेप्रप
ध्यायस्वाहा।पूष्णेनरंधिषायस्वाहा।पूष्णेघृणयेस्वाहा।पूष्णेनरुणाय
स्वाहा।पूष्णेसाकेतायस्वाहा।नमस्तेघर्मभूपतयेस्वाहा।नमस्तेघर्मभुवन
पतयेस्वाहा।नमस्तेघर्मभूतानांपतयेस्वाहा।घर्मायस्वाहा।अश्विभ्यांस्वा
हा।इन्द्रायस्वाहा।बृहस्पतयेस्वाहा।प्रजापतयेस्वाहा।ब्रह्मणेस्वाहा।शेष
प्राय।शितानिचसामंतो।शेषनिमित्तंसुवर्हिष्याहवनीयेहुत्वा।उपयमनेनअं
तर्वेदिप्राग्बिलंसादयीत्वापरिघर्म्यमासंघानिदधदाह।घर्मोत्साप्यमाना
यानुब्रूहि।उपयमनेसम्राडासंद्यांप्राग्बिलंसादयति।स्वाहात्वासूर्यस्यरश्मि
भ्यः।आपरान्हिवेतुप्रस्याग्बिलं।स्वाहात्वानक्षत्रेभ्यःसर्वाणिसंसाद्य।शन्नो
वातइति।शांतिमुपयंति।उपसदेवतासंकल्प्यंअध्वर्युःस्फ्यमाददानअ
हाग्नीन्मंदतीरधिश्रयतविरधिश्रयेध्रुपासीद।भुवन्वप्रनेतितदातिथ्याब
र्हिरेकविधंप्रस्तरंचबध्नातलस्यांचतुर्दशधा।वेदपरिमोजनीयंचव
त्सकर्मणवा।आतिथ्यालएवप्रस्तरेबर्हिःपरिधिषुअाकलामिरपाद
यं:पुरस्तादित्यादिज्योतिष्टोमार्थेनोपसदिष्ठायस्यइतित्रिःउपसत्संबंधिराज्यं।

॥२६॥

चेत्साहुतं मंत्रवत्तदिदानीं प्रेषमुक्त्वा कर्म प्रोवाचामि स्या चैव: एवमग्ने पिथ्यकनीन्य
रिस्तीर्यस्य मग्निहोत्रहवणीं जुहूरुप भृतं स्रुवं। आज्यस्थाली स्रुवसादनार्थं
पात्रांतरं वेदं वेदाग्रमिति सादयेत्। अग्नाप्रथमामिमां वाचयेत् षष्ठिविषायत्वा:
प्रयुज्य मदंतीरानीयसंस्रवमस्तु घर्घ्व: महीनां पयोसि: चै। अंतरितं र: अ
यं वेद: प: नवेदिं संमार्ष्टि। देवस्य त्वा। स्रुचमादाय संमत्र्य पृथिव्ये वर्मासि सादि
स्तीर्णो बर्हिषत्उपरिस्तं नयज्जुहरति। नखननतितिर्यं चस्तब्धाम दंतीरा सादयेत्
बर्हिरुपसादयस्रुवं च स्रुचो च संमृड्हि विषादि हि। स्रुचं समंत्रेणास्रुचो ध्रौव

६ ध्रौवेण

णां संमज्य स्रुवेणाद्वरेद्वा जुहूं चतुरुपभृतिं। आज्यपात्रांतरे च नीयाज्यस्थां
ल्यां। एते असदतां: नेवि: । यविस्नु: स्यो: स्यतम् अग्ने: अध्वर्यु: प्रदक्षिणमाव
युत्कमनेन गार्हपत्यमुपविश्य देवपत्नीर्व्याचष्टे सिनेंद्रस्य। धेना बृहस्पते:।
पथ्या पूष्ण: वाग्वायो:। दीक्षा सोमस्य पृथिव्यग्ने:। वसूनां गायत्री। रुद्राणां
त्रिष्टुप्। आदित्यानां जगती। विष्णोरनुष्टुप्। वरुणस्य विराट्। यज्ञस्य पंक्ति: ॥२६॥
प्रजापतेरनुमति: मित्रस्य श्रद्धा। सवितु: प्रसूति: सूर्यस्य मरीचि: चंद्रमसो
त्यां सकृद्ध्रौवेण गृहीत्वा पात्रांतरं स्रुवं च जघनेन वेद्यै निधाये त्यादि स्रुचौ स्व स्वमंत्रेणासाद्य ध्रौवेणात्
स्थाः अंतरस्थेनाज्येन स्रुव भमि पर्यंथ आज्यस्था...न्यामवनयाति। यत: ५ ... हीवाज्यस्थां ६

रोहिणी। स्वधा कामदुघा। पर्जन्य विद्युत। चतस्रो दिशः। चतस्रो वान्तरदिशः
अहश्च रात्रिश्च। कृषिश्च वृष्टिश्च। त्विषिश्चापचितिश्च। आपश्चौषधयश्च। ऊर्
क् च सूनृता च देवानां पत्नयः। अग्नये समिध्यमानायेत्यादि अभ्यादधाति समस्त
द्वा त्रिर्वा निसमिधं परिश्रयानद्यि वेदेनोपवाजयति आज्यस्थाल्याः स्रुवेणा
घार्य। अग्नीदग्नीं संमृड्ढि। न स्रुचो अन्यामुत्तरं प्रत्याश्रावित। अग्निर्देवो हो
ता देवान्यक्षत्सीदहोतः। एतावान्प्रवरः। घृतवती शब्दे जुहूपभृता वादान
आह। अग्नये स्रुपां भु। अनुब्रूहीत्युक्त्वे। अत्याक्रम्याश्राव्य प्रत्याश्रावि
ते आग्निं यजेति वषट्कृते पूर्वार्धे जुहोति। तत्र स्थ एव वाघे नमध्ये सोमं यज
ति। समाव पमानः। विष्णवेनुब्रूहि। विष्णुं यज। पश्चात्सर्वं जुहोति। सर्व
षादिषिः उदङ् स्याक्रम्य यथायतनं स्रुचौ सादयित्वा अग्निनामदं य पाइया
दि निह्नुवीत। अपराह्णे सव्योत्तरिणः सव्यपाणौ प्रस्तरं गृहीत्वा आज्यस्था
ल्याः स्रुवमग्रे प्रस्तरोपरि इषुवद्धृत्वा प्रथमामुपसदं जुहोति। यां ते अग्न
यात्र्याशया तनूर्वषिष्ठा गह्वरेष्ठाग्रं वचो अपावधीं त्वेषं वचो अपावधीं

त्रिस्त्रिः संमृड्ढि ५

आश्राव्य ५

सोमायानुब्रू सो मं यज ५

पार

५ स्वाहा। अग्नयइद्· परिधिषु स्रुकलानुपसंगृह्णाति प्रस्तरेबर्हिर्यावन्मात्रंस्यं
द्ध्याविग्रस्थ्याहवनीयेतिवाल्याद्भिरस्रुक्ष्योत्तरतः सादयति। प्रथमायामुप
॥२७॥ सादियत्रस्रुचः। सादितास्ततः प्राग्गता द्वितीयायांततो पितीयायां। स्वरमा
ण्याडिवोपसद्भिः प्रचरेयुर्नकृताकृतमाद्रियेरन्· अग्रेणशालांतिष्ठन्संप्रेष्य
ति। सुब्रह्मण्यसुब्रह्मण्यामाह्वय त्रिस्तनव्रतं प्रयछन्त। प्रतिप्रस्थातान्यः स्व
यंवा प्रयछति मध्यंदिने परिश्रियमानयति· याते अरुद्रियातन· स्तस्वाहा। स
मानमन्यत्। स्थूणाशंकुमदासंघश्रिरपरकरणानिवर्जयित्वाएवमापरानि
कीभ्यां प्रवर्ग्योपसद्भ्यां प्रचर्योपनिष्क्रम्यसंप्रेष्यति। सुब्रह्मण्यसुब्रह्मण्यामा
ह्वयद्विस्तनंव्रतं दोहयत उपसमिंधनवेलायामग्नीन्ज्योतिष्मादृत्यादि। त्रि
स्तनमर्धरात्रे प्रयछति। अपररात्रे संप्रेष्यति। द्विस्तनव्रतं दोहयतः अग्नीज्यो
तिष्मादियादि उदितआदित्ये। विसृष्टायांवाचिमध्यमाभ्यां प्रवर्ग्योपसद्भ्यां
प्रचरंति। मध्यमासूपसत्सुजुहोति। याते अग्नेर· उपनिष्क्रम्य सुब्रह्मण्यसुब्र ॥२७॥
ह्मण्यामाह्वाय द्विस्तनव्रतं प्रयछति। व्रतेप्रदाय। आहवनीयपूर्वशंकोः

मध्यमश्रोत्तरवेदिकः शंकुः तस्मात्संचदक्षिणापंचोदं विक्षुद्राणितेश्रोणीयूपावटीयात्र सर्गर्थप्रक्र
षट्त्रिंशाचिपदानिप्रक्रम्यत्राग्नालामुखीयशंकुंनिहन्यततः षट्त्रिंशायदेषुयूपाव
टीयं शालामुखीयाद दक्षिणोत्तरयोः पंचदशपदेशं कृश्रोण्योः यूपावटीया
द्वादशपदे दक्षिणोत्तरयोरं अक्ष्णयामानेन प्रमायसमंतदृस्पंदयापरि
तनोति। पृथ्व्यामातनोति। यूपावटीयादंकोरनुस्पंद्यंद्वादशप्रयं चिक्षुद्रपदा
निप्रक्रम्यचत्वारिदक्षिणाक्षुद्राणिचत्वार्युदं चितावंसौ। अक्ष्णायाप्रमाय
स्पंदयापरितनोति। मध्यमादोत्तरवेदिकात् षट्प्रयं चिपदानिदक्षिणासह
मंतत्स्पंयेनिदधाति सप्तपरवाणां कालः। महावेद्याउत्तरादंशौ याद्धंकोरनु
स्पंद्यद्वादशप्रयंचित्रदंचत्रयोदशसप्तकरः एवंमि[illegible]त्वावेदादानवेदिसंमा
र्जनेकेचिदिच्छंति। वेदिपरिस्तीर्यापरवाणां कालात्[illegible]बयजुर्हरतिपाणीसंम
र्ययस्फ्यादानादिपशुबंधवत्। आदित्यवती विश्वेदेव्यावती वर्षा न्दिवो° यदा
ग्नीध्रस्त्रिर्हरति। अथाग्रेणशालां तिष्ठन्संप्रेषमाह। वेदिकारावेदिंकल्पय
तप्रस्थलानिभिंदतप्रतिनिम्नान्पूरयतकिंशारूणिनिरस्यतप्राचीमुद
चींप्रवणानिस्तिष्ठत। अध्वर्युपुरुषाः स्फ्यपरशुपरश्वव्यादिभिस्तत्थाकुर्व
ति। अध्वर्युर्महावेद्याउत्तरादंसीयाद्धंकोर्विध्यंतेनत्रीणिपदानिप्रक्रम्यो

उपरवदेशौप
धिश्रेवर्मासी
त्यादिमहावेद्याः
पूर्वपरिग्राहप
रिग्रहाईमान
राःकृणुतवेदि
मेत्स्यवसुमनीः
रुद्रवनीना ५

सयोः ३

उपरवदेशानु
प्रनि देवस्स
विनुःसवेकर्म
रुण्वनिचे पसः
५

॥२८॥
अस्तिष्ठा चत्वा,
रि स्यमुद्धान
मित्यादि

दग्धे सचात्वालमध्यः। उदोकमेव सचात्वालात् दक्षिणांतो वा। तच्चात्वालं परिलि
खतितं पशुवदुत्तरनाभिप्रच्छादनांते आपराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचर्योपनिष्क्र
म्यसंप्रेष्यति सुब्रह्मण्य सुब्रह्मण्यामाह्वय दीक्षितेन व्रतं दोग्ध्यता तद् धरात्रे प्रयच्छति।
समानमन्यत्। अग्नीज्योतिष्मतइत्यादि। अपरात्रे संस्थास्ति। एकस्तनव्रतं दोह
यत। अग्निर्नीत्यादि उदित आदित्ये विसृष्टवाग्यां वा स्वि उत्तमाभ्यां प्रवर्ग्योपसद्भ्यां
प्रचरति। याते अग्ने हराशया। अग्रेपात्राग्रं त्वां तिष्ठन् सुब्रह्मण्य सुब्रह्मण्यामाह्व
याधस्तनव्रतं प्रयच्छत। पूर्ववत्प्रदाय तदानीमेवापराह्णिके प्रवर्ग्योपसदो सम
स्योपनिष्क्रम्य सुब्रह्मण्य सुब्रह्मण्यामाह्वय प्रतिप्रस्थातः प्रवर्ग्यस्यावृता प्रवर्ग्य

ना
घर्म्यं
ं संसादयाह्वा सर्वपदं त्रेधा विभज्य। नमो वाच इति त्र्यो तिं पटति। प्रतिप्रस्थाता अ
ग्रेणाहवनीयं तृणानि संस्तीर्य परिसादयति प्रवृंजनीयाद्वासनीयोरवरोना
नि वसतयाः समुप्यात्रेव। आग्नीध्रः उच्छिष्टखरं अन्यस्मिं ते समुप्य दक्षिणायाह
रायनिर्हृत्य मार्जालीये देशेन्युप्य यथेतमेति। अध्वर्युः द्वाराग्निपरिश्रिय प्राग्वंशा
एव पत्नीमुदग्रतो नवाससा प्रच्छाद्य। अग्नीन्परिस्तीर्य। दक्षिणतो ब्रह्म यज ॥२८॥
मानोवुपविशतः। अध्वर्युः गार्हपत्य आज्यं संस्कृत्य प्रतिप्रस्थाता आहवनी

येन्नालोकमिध्ममादीप्यमुखदघ्ने धारयन् पुरस्तात्प्रत्यङ्मुखस्तिष्ठति। तमध्व
र्युः पश्चात्प्राङ्मुखस्तिष्ठन् अन्वारभ्याभिजुहोति घर्मयाते दिवि शुग्या गायत्र्यां
छंदसि या ब्राह्मणे या हविर्धाने तां त एतेनावयजे स्वाहा। घर्माय इदं। प्र
तिप्रस्थाता तमग्नौ प्रास्यत्यपरमादीप्यनाभिदघ्ने। अध्वर्युः घर्मयाते अंतरि
क्षे शुग्या गायत्रे त्रैष्टुभे छंदसि या राजन्ये याग्नीध्रे तां त·। घर्माय इदं· प्रतिप्र
स्थाता तमग्नौ प्रास्यापरमादीप्य जानुदघ्ने अध्वर्युः घर्मयाते पृथिव्यां शुग्या
जागते छंदसि या वैश्ये या सदसि तां त एत·हा। प्रतिप्रस्थाता तमग्नौ प्रास्यति
। अध्वर्युः द्वारपिधिविवृत्य प्रावर्ग्यिकं सर्वमादाय सर्वे सह पूर्वया द्वारोपनिष्क्रामंति
अनुनोद्घा·यः। अन्विद·षः अध्वर्युरिवमंत्रो महावेदिमवक्रम्य प्रस्तोतः
सामानि गाय। प्रस्तोत्रा सह सर्वे निधनमुपयंति। दिवस्त्वा परस्पाया अंतरिक्ष
स्य तनुवः पाहि पृथिव्यास्त्वा धर्मणा वयमनु·से। अभिक्रम्यैतत्परवेदंत्रोत्तरती
यं निधनं मुक्तो। प्राणस्य त्वा परस्पाये चक्षुषस्तनुवः पाहि श्रोत्रस्य त्वा ध
र्मणा वय·से। अभिक्रम्योत्तरवेदिं स्थित्वा। अनेनोदकुंभेन संततया
विषुवति द्वितीयं निधनमुपयंति। ब्रह्मणस्त्वा परस्पायाः क्षत्रस्य तनुवः पाहि। विशस्त्वा धर्म
णा वयमनुक्रामाम सुविताय नव्यसे। अभिक्रम्य

नरेणो

60

धारयात्रिः प्रदक्षिणांपरिषिंचन्पर्यैहि। आग्नीध्रः सप्रवर्ग्यामुत्तरवेदिंपरिषिंचंस्त्रिः प्र
दक्षिणांपर्येति। अध्वर्युः परिषिच्यमानेयजमानंवाचयति। वसुरसिशंयुधायाः शि
मुर्जनधायाः शंचवक्षिपरिचवक्षि आग्नीध्रः निधायकुंभंयथेतंत्रिरपसलैः प
र्येति। अध्वर्युः चतुःस्रक्तिर्नाभिर्ऋतस्यसदोसिविश्वायुः शर्मसप्रथाः। अपद्वेषो
अपह्वरोन्यव्रतस्यसश्चिम। उत्तरनाभिमभिमृश्य। खरावुत्तरेनाभिमवकीर्यध
ष्टीभ्यांप्रागायतंखरंकृत्वातत्रसुवर्णशकलंनिधायकृष्णाजिनंप्राचीनग्रीवमुत्तरलो
मास्तीर्यरौहिणपिष्टेमुंजप्रलवसिकताभिरनुप्रकीर्यप्रचरणीयंमहावीरंशा
फाभ्यांपरिगृह्य घर्मैतत्तेन्नमेतत्पुरीषंतेनवर्धस्वचाचप्यायस्ववर्धिषीमहिचवय
माचप्यासिषीमहि। दध्नामधुमिश्रेणपूरयित्वा। मही नांपयोसिविहितदेवत्रान्ज्यो
तिर्भाअसिवनस्पतीनामोषधीनांरसोवाजिनत्वावाजिनोवनयामः। पुनरभिमृ
र्य। ऊर्ध्वेमनः सुवर्गा। पूर्वार्धेखरस्यासाद्य। अभितः प्रचरणीयंमहावीरंक्रमेणप
रिचिनोत्यादियमंडलवत्। बिल्ववंतिदध्नामधुमिश्रेणपूरयित्वा अन्यानिसमज्य
वेदरज्जुदामासंदीपवित्रादीनिविस्रस्यस्थाल्युपरिधावित्रंसमिधोदर्भौद्विवार
अभितत्पशायोशफाभ्यांपरिगृह्य। उपप्रचरणीलिकेभोपिन्वनेमोजेम

॥२९॥

मोत्तर२५

॥२९॥ देरो

पि

वचः त्राको रौहिणाहवनी समिधः कुशावेदकं। स्थूणो पयमंजूच परिध्यश्री
च दृष्टिके। धवित्रेस मिधस्थाली धवित्रं चकपालकेस्रुवं कुशामेयं वेदमा
संदी मदमेवच। धर्मंनरसे • मःहा • मदं सिकतामुंजरौहिणौरनुप्रकीर्यवूह्मा
नी जिनेन प्राचीनग्री वृणोन्तरलोम्नाप्रच्छाद्य • अयंयः पुरुषरूपासि सनन्नास्य
नतिष्ठस्मिनोर्ध्वीनतियाग्निविधांतेनु विहितोस्मि विधां मेनुविहितोसियत्स्वमसि
सोहमस्मि योहमस्मि सत्वंनाकमारोह सहयजमानेन साके। उपस्थाय। आ
स्कां द्यौः पृथिवीमस्कान् ड्डायत वृषभो युवागाः स्कंनेमा विश्वा भुवनास्कंतो य
ज्ञः प्रजनयतु आस्कान् जनि प्राजनि आस्कंन्नाड्डायत वृषा। स्कंनात्प्रजनिषीम
हि। दर्भाम धुमिश्रेपाण्यात्रिः प्रदक्षिणं परिषिंचन्पर्येति अग्निम्। पूर्ववत्सदक्षि
णात्रिः परिषिच्यानिधाय कुंभं त्रिरपसलैः पर्येति। अध्वर्युः परिषिच्यमानेयजमानं
वाचयति। रंतिर्नामासि दिव्योगंधर्वस्तस्यतेपद्वद्विर्धानं अग्निरध्यक्षाः। रुद्रोधिप
तिः। समहमायुषा। संप्राणेन। संवर्चसा। संपयसा। संगोपत्येन। संरायस्पोषेण
व्यसो। योस्मान्द्वेष्टि। यंचवयं द्विष्मः। अचिक्रदद्वृषाहरिः। महान्मित्रो नदर्शतः। स
ꣳ सूर्येण रोचते। चिदसि समुद्रयोनिः। इंदुर्दक्षः श्येन ऋतावा। हिरण्यपक्षः शकुनो
समग्रमुष्टिना वोक्ष्य प्रस्तोतर्वार्षाहार२ सामगायेष्णाहो त्रियंचानेनोदकुंभेन संततया धारया ६

सुरय्युः। महान्सधस्थे ध्रुवा आनिषत्तः। नमस्ते अस्तु मामाहिंसीः। विश्वावसु
ंसोमगंधर्वा आपोदद्भृशुषीः। तदृतेनाव्यायन्। तदन्ववैत्। इंद्रो रारहाण आ
सां परिसूर्यस्य परिधीं रपश्यत्। विश्वावसुरभितन्नो गृणातु। दिव्यो गंधर्वो रजं
सो विमानेः। यद्वाघासत्यमुतयन्नविद्म। धियोहिन्वानो धियइन्नो अव्यात्। स
स्निमविंदच्चरणेनदीनां। अपावृणोद्दुरो अश्मव्रजानां। प्रासांगंधर्वो अमृतानि
वोचत्। इंद्रोदक्षंपरिजानादहीनं। यज॰ घर्ममुपतिष्ठते। एतत्त्वं देवघर्म देवो देवा
नुपागाइदमहं मनुष्यो मनुष्यान्सोमपीथानु मेहिसहप्रजयासहरायस्पोषेणा अज
लिनापो गृह्णाति सुमित्रा नः तु। दुर्मित्रास्तस्मै भूयासु। द्विष्मः। अयपस्थपस्यत्या दि

आपओषधयः
सेतु। नैर्ऋत्यां
निरूक्षाति।

रामुपष्ठते। उद्वयं तमसस्परि पश्यंतो ज्योतिरुत्तरं। देवं देवत्रा सूर्यमगन्मज्योतिरु
त्तमं प्रवर्ग्यमवकाभोरणाप्रति घ्राद्यागो घारसमा वीतिहिरा ति। यो वोभ्यो महावीरं गोपा
यप्रस्तात् चैयेतेनान्विहि। यथोति मेयगार्हपत्येजुहोति। उदुत्यं॰ सूर्यं स्वाहा। चित्रं॰

तिष्ठंते ३

स्रुवाहुती हुत्वा ३

अस्वाहा। सर्वत्रालममुखीयंत पेष्व इममुपुयमस्मभ्यं सनिं। गायत्रं नवीयांसं
अग्नेदेवषु प्रवोचः। आग्नीध्रीयेदेशे उत्तरानांतिमुपयंति। शंनोवातः पवतां

॥२०॥

मातरिश्वेति। आग्नीध्रीयस्य पश्चादुद्वत्तासं कल्प्य आतिथ्याबर्हिः। रौपंचवि

॥२०॥

(६३)

चर

अध्वर्युरुत्तरवेद्यां उत्तरस्तूपयमनीर्युग

धंतेनैव प्रस्तरेण सलभुल्बादि संभरति। तएव चिधती प्रज्ञाते निधाय तैरेव
परिधिभिरिध्मं संभरति। ततस्त्वां त्रयो विंशतिर्धापरिभोजनीयान्वेदं कृत्वा
महाबर्हिः संभृत्य अन्यानः पित्रार्थं मपूर्वमुष्टिं संभृत्य पशुवदग्नीषोमी
यस्य पशोः शाखां समन्त्रां तूष्णीं प्लक्षशाखां। एवं सवनीयस्येदं धिष्ण्याद्यर्थं
तूष्णीं सवनीमिध्मार्थं समंत्रां दधिघर्मार्थं भरतात क्यार्थमाश्रिसर्थं च तूष्णीं मैत्रा
वरुणदण्डार्थं समंत्रां इत्यष्टौ शाखाः क्रमेण युगपद्वा हरन् इषे त्वेत्यादि यजमानस्य प
त्न्याहितं। अभ्यादधाति ध्ममित्यादि। पदं तृतीयं शालामुखीय निकटे तृतीय
मुपयमनीषु तृतीयमंजनार्थं निधाय। अग्निप्रणायनकाले कश्चिद्राजानमादाय
खोत्तरस्मिन्नग्नौ प्रणीते तेनैवाग्न्यासंधौ स्थापयति स्वयं होमांतं ब्रह्मणा मु
त्तरवेदेरुत्तरतो मंत्रेणोपवेश्य। अध्वर्युः प्राणीसंभृत्यो त्तरपरिग्रहादि त्रिप रव
देरोत्तरब्धां प्रोक्षणीरासादये ध्मा बर्हिरुपसादय। प्रवैश्य आग्नीध्रः प्रोक्षणी
रासाद्य महाबर्हिरुत्तरवेदिसमिंधनार्थं लौकिक मिध्ममासादयति। अध्व
र्युः आहृताभिः प्रोक्षणीभिराद्या महाबर्हिरुत्तरवेदिसमिंधनार्थं लौकिक
मिध्ममासादयतिभिः महावेदी बर्हिरिध्मं च तूष्णीं प्रोक्ष्य। अपूर्वबर्हिर्मुष्टिं

तृतीयां छित्वा तृतीयं तस्यापाकरणादि करोति ५

येण शालामु

खीयं नीत्वोत्तरस्मि

ईक्षिपातो

अग्निदेशे गत्वा सदेशे गमन सीयं तत्कृत्वा। १

उपरवेदेः स्पयमुत्तरस्य २

अन्वारब्धे यजमाने आहवनीये जुहोति। स्व स दिवं स्व० ५

प्रोक्ष्यते न पृष्ठ्यां प्रच्छाद्य अनसी प्रक्षाल्यां तरेणा चात्वालोत्करौ प्रपाद्य महावेदां

पृष्ठ्याया दक्षिणा तदुत्तरस्य अरत्निमात्रं विहाय प्राची स्थापयित्वा उद्धृतफल

के दक्षिणामनुद्धृतमुत्तरं। अध्वर्युः प्रोक्षति। वैष्णवी विष्णवे त्वा घेथां। एहि यजमा

ना। पूर्वयाद्वारा शालां प्रविश्य शालामुखीय आज्यं विलाप्योत्पूय यं जते मन इति

चतुर्गृहीतं हुत्वा· अपरं चतुर्गृहीत्वा· आज्यस्थालीं सस्रुवां स्फ्यमुदपात्रं बर्हिर्हि

रण्यमादायैहि यजमाना। अन्वाग यजमानोन्वी पत्नीपदत्तीयमादाय· पूर्व

याद्वारोपनिष्क्रम्य· दक्षिणास्य हविर्धानस्य दक्षिणास्यां वर्त्मन्यां स्फ्येनोद्धृत्य

वोक्ष्य हिरण्यं निधाय परिस्तीर्य परिषिच्य चतुर्गृहीतमिदं विष्णुरिति हुत्वा· प

दपांसूनाम धान्यल्यं जलावोप्य संस्रावेणाभिघारयति· पत्नी प्राचोनानेनपा

णिना दक्षिणामक्षधुरमनक्ति· आनो वीरो जायतां कर्मण्यायः सर्वं नुजी

वामयो बहूनामसद्वशी। अध्वर्युः अपरं चतुर्गृहीत्वोत्तरस्य हविर्धानस्योत्तर

स्यां वर्त्मन्यां स्फ्येनोद्धत्यावोक्ष्य हिरण्यं निधाय संपरिस्तीर्य परिषिच्याभिजु

होति· इरावती धेनुमती हि भूतं सूयवसिनी मनवे यशस्ये। व्यस्कभ्नाद्रोद

सी विष्णुरेते दाधार पृथिवीमभितो मयूखैः स्वाहा। विष्णव इदं०। सर्वत्र एव

॥२९॥

॥२९॥

पदपां स्तृणन्त्यल्पं जलं तां वोप्याभिघार्य पत्नीपूर्ववदुत्तरमक्षधुरमनक्ति आ
नो॰ यज्ञौ। आज्यस्थाल्यादीनि प्रतिप्रस्थात्रे संप्रदाय नयंति पत्नीं ह्वयंति
होतारं॰ अथैने हस्ताभ्यां परिगृह्य संप्रैषमाह। हविर्धानाभ्यां प्रवर्त्यमा
नाभ्यामनुब्रूहि। प्रथमायां त्रिरुक्तायां प्रवर्त्तयति। प्राचीं प्रेतमध्वरं कल्प
यंती ऊर्ध्वं यज्ञं नयतं मा जिह्वरतं। अक्षशब्दे जपति। सुवाग्देव दुर्यां आव
ददेवश्रुतौ देवेष्वाघोषेथां। अध्वर्युः प्रतिप्रस्थाता चोत्तरेण हविर्धाने पा
[illegible]श्रितयुमध्यमादोत्तरवेदिकाछंकोस्त्रीन्प्रतीचः प्रक्रमान्प्रक्रम्योपस्त

नसोः

मनयोः। अग्रे स्थापयतः। अत्र रमेथां वर्ष्मन्पृथिव्याः। दक्षिणस्याध्वर्युरुत्त
स्य प्रतिप्रस्थाता। दिवो वा विष्णवुत वा पृथिव्या महो वा विष्णवुरुत वांतरि
क्षाद्धस्तौ पृणस्व बहुभिर्वसव्यैरा प्रयच्छ दक्षिणादोत सव्यात्। दक्षिण
तामेथीं निहत्य विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि
यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायो। मेथीं मनसा व

रज्वौ

ध्नां। एवं प्रतिप्रस्थातोत्तरस्योत्तरतो मेथीं निहत्येव बध्नाति। अध्वर्यु
र्युबुकादरत्निमात्रे गर्त्तं खात्वा तद्दक्षिणोत्तरयोर्युगांतार्जवेन गर्त्त

यं। प्रतिप्रस्थातेवमुत्तरतः। एवं षट् प्रस्थात्। तेषु प्राचीनकर्णास्थूणा। उच्छ्रियतासंदोत्येवं शे।
प्राच्य। विष्णोरराटमसि। पुरस्ताद्रराटीं बध्वा। विष्णोः पृष्ठमसि। मध्यमच्छदिरिषिनिधा
य विष्णोःस्यूरसिः दक्षिणोत्तरयोर्युगपत्। परितृस्त्रियप्राचीप्रतीचीचद्वारो
दृस्त्यादक्षिणाद्वार्बाहौकुशमुष्टिमुपनिगृह्य॥ विष्णोःस्यूरसि। दर्भेणास्यंद्यानिक्षिप्य।
विष्णोर्ध्रुवमसि। ग्रंथिं कृत्वातं विस्रस्यसप्रेष्यति। अकुर्वतो ग्रंथीन्हस्तको शालेहु
निस्तिष्ठतः। प्रतिप्रस्थातेवमुत्तरे। एवमपरयोर्द्वार्बाह्वोः॥ अध्वर्युः वैष्णवमसि
विष्णवेत्वा॥ हविर्धानमभिमंत्र्य॥ शालामुखीयाघंकोरकंस्पंध्य। षट् प्राचः
प्रक्रम्यान्प्रक्रम्यदक्षिणा सप्तमं। तंतोदेवस्यत्वेत्यभ्रिमादाय अभ्रिरसिनारि
रसि। अभिमंत्र्य। परिलिखितमिति। तयोदुंबर्यावटंत्रिःपरिलिख्यायनपस्य
स्या। तद्वात रहिदममोदुंबर्यावटं खनन्प्राकूपुरीषमुद्वपतात्। सतथाकरोति। शाला
मुखीयाघंकोरकंप्रक्रमंयत्वा ततआरभ्यदशपदंपूर्वापरं अष्टादशारत्निदक्षि
णोत्तरंचतुरस्रंसदोविमायत्रिः श्रोणिगर्तान्वाप्यादक्षिणस्यहविर्धानस्यपुरो
क्षमुपरवान्विमाय। उनेतरोहिहि मानुपरवान्खनप्रादेशमुखान्प्रादेशा। तस्याद
न्वाहुमात्रानवाचोसंमिंदनुपरिष्टादधस्तात्संतृणान्। सतथाकरोति। उ

अग्निनोरायःस्फवीरः॥ अक्षात्मांतरेणचात्वालोत्करौर्ग्रपाद्यपुरोवटंप्रागग्रांस्थापयति ४
परवपुरीषंदक्षिणस्यहविर्धानस्यपुरस्तात्युप्यचतुरस्रंखरंसिकताभिराभ्राग्निनंकृत्वा
देवस्यत्वेत्यभ्रिमादाययाभिमंत्र्ययूपावटंपरिलिख्य। अग्नीदेहिमंयूपावटंखननोपरसं
मितंप्राकुपुरीषमुद्वपताच्चतुरंगुलेनोपरमतिखननात्। प्रतिप्रस्थाताऔदुंबरींस्थू
णांनिखातादूर्ध्वंयजमानेनसंमायाधस्तात्परिवासयति। अध्वर्युःएहियजमानायव
मितिप्रोक्षणीर्बर्हिर्मुष्टिमाज्यस्थालींस्रुस्रुवांमैत्रावरुणदंडंहिरण्यमुदपात्रमादा
यऔदुंबरींपुरस्तादर्वाचींप्रोक्षति। दिवेत्वांतरिक्षायत्वापृथिव्यैत्वा। अवटेपो
वनयति। शुंधंतांलोकाःपितृषदनाः। यवान्। यवोसियवयास्मद्द्वेषोयवरातीः। प्रा या
चीनावीतीबर्हिर्हस्तेव्यतिषज्यावस्तृणातिपितृणांसदनमसिहिरण्यमंतर्धाय
स्रुवाहुत्याभिजुहोतिपितृभ्यःस्वाहा। पितृभ्यइदं। यज्ञोपवीत्युपस्पृश्य। औदुं
बरीमुच्छ्रयति। उद्दिवंस्तभानांतरिक्षंपृणदृंह। प्राचीनकर्णीमिनोति। द्युतान
स्त्वामारुतोमिनोतुमित्रावरुणौध्रुवेणधर्मणा। प्रदक्षिणांपुरीषेणपर्यूहति। ब्रह्म
वनित्वाक्षत्रवनिंसुप्रजावनिंरायस्पोषवनिंपर्यूहामि। ब्रह्मदृंहक्षत्रंदृंह मैत्रावरुणदंडे
प्रजांदृंहरायस्पोषंदृंह। अन्यूनमनतिरिक्तंपरिन्यस्यादंमुपनिनीयविश्वा नसंहति॥२
स्विहिरण्यंनिधायस्रुवाहुत्याभिजुहोति। घृतेनद्यावापृथिवीआपृणथां
पात्र२

॥२२॥

५ स्वाहा द्यावापृथिवीभ्यामिदं। श्रांतमन्त्वत्रावयति। स्मिगाते स्वाहाकारः प्राचीनकर्णाः स्थूणाद्वारछिद्रसहितास्सदीचोवंशान्स्रोहृ। इंद्रस्यसदोसि मध्यमं छदिरधिनिधाय- स्रभितोहू। विश्वजनस्यछायाछिर्मत्रः। मंत्रावसादक्षिणोत्तराणि नव। सधिषुत्तरावर्तान्कृत्वा- परित्वागिर्वणोगिर इमाभवंतु विश्वतः। वृद्धायुमनु वृद्धयोजुष्टा भवंतु जुष्टयः। परिश्रियप्राचीप्रतीचीचद्वारौकृत्वा दक्षिणद्वारबहिकुशामुपसंगृह्यादर्भपोस्यंधांप्रवयति। इंद्रस्यस्यूरसि। ग्रंथिं करोति। इंद्रस्यध्रुवमसि। विस्रस्य स्रकुर्वतोग्रंथीन्हस्तकोत्रालेर्निस्तिष्ठन। एवमुत्तरेप्रतिप्रस्थाता। एवमपरयोः। स्रध्वर्युः। ऐंद्रमसीदायत्वा। सदोभिमृश्य। महावेद्यामुत्तरादंसीयाछंकौर्विद्धं तेनाशादशप्रतीचः प्रक्रमान्प्रक्रम्य पंचारत्निस्रतेर्वेर्घर्हू बहिर्वेर्घर्हू वेर्दाहू स्राग्नीध्रागारं कृत्वा परिश्रियदक्षिणाद्वारं कृत्वा। एतेनमार्जालीयो व्याख्यातस्तस्योदीचीद्वारं कुर्वंति। स्रभ्रिं यवमतीःप्रोक्षणीर्बर्हिर्हस्तमाज्यस्थालीं सभ्यवांचर्मफलकेषडूरांकृष्णा वाणांहिरण्यमुदपात्रमादायैहि यजमान। पूर्वयाद्वाराहविर्धानेप्रपाद्य दक्षिणास्यहविर्धानस्य। नीडेचर्मपुरोक्ष्यमितराणिसादयित्वा। देवस्यत्वे

॥२२॥

(६७)

ण

भ्रिमादायाभिमंत्र्यदक्षिणपूर्वादीनुपरवान्परिलिखितमितित्रिःपरिलिख्य क्रमेणखनति। रक्षोहणोवलगहनो वैष्णवानुत्खनामि। दक्षिणपूर्वस्यांस्नानादित्तिं। इदमहं स्मा २

तवलगमुद्वपामियन्नः समानोयमसमानोनिचखानेदमेनमधरंकरोमियोनः समानोयोसमानोरातीयतिगायत्रेणछंदसा। यजमानस्याधस्याद्पात्रांतरेपांसुद्वपति। अवबाढोवलगाः द्वितीयादत्ते। इदमहंतं त्रिष्टुभेनछंदसा। अवबाढो वलगाः तृतीयादत्ते इदमहं ॰ ति जागतेनछंदसा। अवबा॰ चतुर्थादत्ते। इदं। तं वैयानुष्टुभेनछंदसा। अवबा॰ पांसुनसंचरेपरावपति। अत्रयजमानः पश्चान्मनसा ध्यायति। अपतपस्यत्र्या। अध्वर्युः पूर्वयोर्दक्षिणमभिमृशति। यजमानः। उत्तरमभिमृश्य अध्वर्योकिमत्र। अध्वर्युः। भद्रं यजमानः। तं नौसह। अध्वर्युः यजमान किमत्र। यजमानः। भद्रं यजमानः। तंनौसहमत्र॰ यज॰ भद्रं। अध्वर्युः तंनौसह। दक्षिणयोध्वर्युरभिमृशातिपूर्वंयजमानोध्वर्युः प्रथमं पश्चात्यथयजमानः अपरयोरुत्तरम रपरम ध्वर्युरभिमृशाति दक्षिणंयजमानः प्रथमंपश्चात्यथाध्वर्युः। यजमानः प्रथमो यजमानोत्तमः अध्वर्युः क्रमेणापरवानभिमृशाति। विराडसि सपत्नहासम्राड

१ य॰ २

२ उत्तरयोः पूर्वमध्वर्युरभिमृशात्यपरंयजमानः अध्वर्युः प्रथमंपश्चात्यथयजमानः २

७०

॥२४॥ कर्म०२

सि भ्रातृहा भ्रातृव्यहा स्वराडस्यभिमातिहा विश्वाराडसि विश्व। सा नाष्ट्रघ्ना इं हंता।
मंत्रावृत्या सर्वान्प्रोक्षति। रक्षोहणो वलगहनः प्रोक्षामि वैष्णवान्। रक्षोहणो व
लगहनो वनयामि वैष्णवान्। तथैव सर्वेष्वपो वनिनीय। यवोसि यवयास्मद्द्वेषो यव
याराती:। तथैव सर्वेषु यवान्प्रस्कंदयति। रक्षोहणो वलगहनावस्तृणामि वैष्णवा
न्। तथैव सर्वान्बर्हिषावस्तीर्य रक्षोहणो वलगहनोभिजुहोमि वैष्णवान् स्वाहा।
तथैव सर्वान्हिरण्यमेतद्धायिस्रुवाहुत्याहुत्या। वैष्णवेभ्य इति परवेभ्य इदं। प्रत्येकं सा
र्धप्रादेशविस्तारे प्रादेशत्रयदीर्घे मिलिते समचतुरस्रे अधिषवणफलके आ
दाय। रक्षोहणौ वलगहनावुपदधामि वैष्णवी। संस्पृष्टे उपधाय। द्वाभ्यां पुरस्ता
द्वाभ्यां पश्चाद्वाभ्यामनितानव सर्पणा। यत्रांकुभिः परिहणीस। रक्षोहणौ वल
गहनोपर्यूहामि वैष्णवी। प्रदक्षिणां पुरीषेण पर्यूह्य। रक्षोहणौ वलगहनौ परि
स्तृणामि वैष्णवी। बर्हिषा परिस्तीर्य। रक्षोहणौ वलगहनौ वैष्णवी। अभिमृश्य।
यज्ञप्रतिनिष्ठेति वांतश्मीवा फलकयोरानडुहचर्मास्तीर्य तिरश्चर्मन्फलके प्रग्रीवं ॥२४॥
हादपति। बृहन्नसि बृहद्ग्रावा बृहतीमिंद्राय वाचं वद। नीडे चर्मोत्सादयति। ग्रा
वसु ग्रावाणां दक्षिणास्य हविर्धानस्याग्रस्तोत्रापाकरणाय बर्हिर्मुष्टीन्बध्वा प्र

हियजमानआग्नीध्रीयमध्येस्थेयनोहुत्वावोक्षत्यचात्वालपुरीषंसिकतान्युप्यारत्निमात्रं
परिमंडलंखरंकरोति। विभूरसिप्रवाहणोरौद्रेणानीकेनपाहिमाग्नेपिपृहिमामाहिं
सीः। नभयांमंत्रः। अतःसदसंप्राक्पदद्वयमवत्रोष्यपश्यायांहोतुः। वह्निरसिह
व्यवाहनोरौद्रे० सीः। अग्रिणाहवनीयंपर्याहृत्संहोतधिष्ण्यादक्षिणातोरत्नौमैत्रा
वरुणस्य। श्वात्रोसिप्रचेतारौद्रे० सीः। उत्तरतोरत्नौब्राह्मणाच्छंसिनः तुथोसिविश्व
वेदारौद्रे। सीः। तदुत्तरतोरत्नौपोतुः। उशिगसिकविरौद्रे० सीः। तदुत्तरतोरत्नौनेष्टुः।
अंघारिरसिबंभारीरौद्रे० सीः। तदुत्तरतोरत्नौअच्छावाकस्य। अवस्युरसिदुव
स्वान्रौद्रेसिः। आग्नीध्रीयवन्मार्जालीयं० शुंध्युरसिमार्जालीयोरौद्रे० सीः।
तस्मीपुनराग्नीध्रेन्युप्यात्रप्वर्युःऔत्तरवेदिकमुपतिष्ठते० सम्राडसिकृशानूरौ
द्रे० सीः। आस्तावं। परिषद्योसिपवमानोरौद्रे० सीः। चात्वालं। प्रतक्वासिनभस्वा
नूरौद्रे० सीः। पशुश्रपणं। असमृष्टोसिहव्यसूदोरौद्रे० सीः। पश्चिमसदोद्वारेति
ष्ठनौदुंबरीमुपतिष्ठते० ऋतधामासिस्वर्ज्योतीरौद्रे० सीः। ब्रह्मसदनं। ब्रह्म

देवबर्हिरूं॰वेभ्यः॥सह मंत्रः॥तांबहुलांपुरस्तात्प्रत्यंच स्तृणंति।तूष्णींमर्धस्तनप्रस्तंप्ररायउन्नेता८

ज्योतिरसिसुवर्यामारोद्रे॰सीः तत्रस्थएव अग्रात्‌मुखीयंअजोस्येकपादोद्रे॰सीः॥गा
र्हपत्यंअहिरसिबुधियोरोद्रे॰सीः।इतःप्रभृतिअध्वर्युःप्रस्तूसदा नात्सीयात्।त
त्रस्थेएवंसंप्रेष्यति॰स्तृणीतबर्हिः प्रअतंयछतसमापिप्रतान्कुपथ्वमास्तावंबहु
लंधुस्तणीतसदोहविर्धानेबहुलंस्तृणीतो न्नेतग्रावाणो वायव्यानिद्रोणाकलशोद
शापवित्रंसमवधायपत्नीशालेस८सादयाग्नीदाज्यमधिश्रियप्रतिप्रस्थातःस्रु
चःसमृढ्याज्येनोदेहिमृषदाङ्यायदध्याहर॰दक्षिणेवेद्यंतेमहावर्हिषोमुष्टिंस्तृणी
ति॰देवंबर्हि॰भ्यः।तांबहुलांपुरस्तात्प्रत्यंचस्तृणांति।तूष्णीमर्धस्तनप्रतंप्रदायउन्ने
तीं॰पंचग्रावाणः ससदशप्रादेशमात्राणि।उलूखलाकाराणिएकतोमुखानि।द
शाचमसान्यारभ्मुअदंडस्रुगाकारंद्रोणाकलशंदशापवित्रेचतस्रः स्थालीरुपग्रहादि
चान्यदुपयुक्तंप्रक्षाल्यद्रोणोदशापवित्रोन्यस्यसर्वंप्राग्वंशेसादयति।वायव्यानां
दधिग्रहपात्रमौदुंबरंचतुस्रक्ति।ऐंद्रवायवंरास्नावत्।पिलकावन्मैत्रावरुणं।आश्वि
श्विनं।बैल्वंशुक्रस्य।वैकंकतंम्लक्ष्यांमथिनः।आंशुपात्रमौदुंबरंचतुस्रक्ति।अदाभ्य
मौदुंबरं म्लक्षाआतिग्राह्याणिनैयग्रोधानि।ऋतुपात्रेआभयतोमुखे।इतराणि
नैयग्रोधानिचतुरस्रोब्राह्मणाःहोतुःपरिमंडलाःयजमानस्यविस्तीर्णाग्रौ ग्र्य
स्त्रिरूढ़ातुःप्रशास्तुरधोवक्रः॥ब्राह्मणाछंदसिनतपरिवक्रः।पोतुर्विशाखः।नेष्टु

॥२५॥

वायव्यानि८

॥२५॥

औदुंबराणि
चमसानैयग्रो
धाः॥२

दक्षिणपार्श्वं वक्रः। अच्छावाकस्य रास्नायुक्तः। आग्नीध्रस्तीक्ष्णाग्रः। अध्वर्युः अ
ग्नीषोमीयपशुशाखायाः। पशुवसा वित्रं कृत्वा॰ पशुकुम्भीशाखापवित्रं वपाश्रपण्यौ
स्थानेऽमलं मैत्रावरुणोदं डशालामुखीयस्योत्तरतः स्रुवेषु संसाद्य शुन्धध्वमिति प्रोक्षति
आग्नीध्रः पाणी संमृज्याग्नीन्ज्वलयित्वा परिस्तीर्य शालामुखीयस्याग्नेर्लोपेषु स्फ्यम
गु ग्निहोत्रहवणीं जुहूमित्यादि पंवस्यात्राण्यासाद्य गार्हपत्य आज्यं विलापयति। प्रतिप्र
स्थाता पाणी संमृज्येयञ्झ्मापादक्षितं पवेत्र्य शालामुखीयप्रभृत्युत्तरवेदिपर्यं
तं प्रध्याङ्स्तीर्त्वा पवित्रे कृत्वा॰ यजमानं वाचंयच्छ॰ अग्निहोत्रहवणीमादाय प्रति
तप्य प्रोक्षणीः संस्कृत्य पात्राणि प्रोक्ष्य॰ आज्यं दधि निरूप्याधिश्रित्योभयं पर्यग्नि
करोति॰ अध्वर्युः पाणी संमृज्य॰ मंत्रेण स्फ्यादादानादि खरे देशे स्फ्यस्तं ... वा प्रोक्षणी
रासादयेत्यादि पशुवत्संप्रेष्य आग्नीध्रः प्रोक्षणीः सादयति॰ अध्वर्युः स्फ्यमुदस्य।
प्रतिप्रस्थातानुत्तरवेदिसमीपे इध्माबर्हिरुपसादयति। आग्नीध्रः दक्षिणेन स्रुवं
स्वधितिं सव्येन वेदाग्राण्यादाय शालामुखीये॰ अग्रेवामिति प्रतितप्य स्रुवं मंत्रेणौ
मेंयं वौभौ संमृज्य प्रतिप्रस्थात्रे प्रयच्छति। प्रतिप्रस्थाता॰ जुह्वादीनि पशुवत्प्रतितप्य संमृ
ज्य वेदाग्राणि शालामुखीये प्रक्षिप्याग्रेणोत्करं तृणेषु सादयित्वा पुनरादाय शालामु
खीयसकाशे निधाय। पत्नी शालामुखीयमाज्यं चावेक्षयित्वाधिश्रित्य दध्ना सह प्रा
उत्तरतासादयेत्॥ गार्हपत्यं शालामुखीये संकेत्यैसंकल्पयति। उदस्ये तिष्ठानुमामुदेहि विश्वेदेवा यज्ञियाः संविशन्तः॥ सुवर्गेलो
के यजमानं हि धेहि नास्य हास्था आहुसेमामुपेमः॥ नवासंकल्पयाति॥३

।।२८।।

उ॰ हृत्वा दक्षिणेन प्रोक्षणीः सादयित्वा यजमानमाज्यमसीत्यवेक्षयति अध्वर्युः प्रोक्ष
णीनामुत्तरतआनीय अवेक्ष्या स्रुयप्रोक्षणीभ्यो स्रुय आज्यं दधिचादाय ब्रह्मयजमा
नाभ्यां सह प्रागवंशं गत्वा चेध्मोपभृ वदाज्यानि गृहीत्वा परिकर्मिभ्यः प्रदाय। अप॰ उपस्थ
स्य ब्रह्मणो राजानं दत्वा। अमाराजानमादाय शालामुखीयमेप्रणपरीयोत्तरतो वस्था
यान्वगग्निंनयति। अध्वर्युः शालामुखीये प्रणयनीयमिध्ममादाय॰ चात्वालादुपय
मनीः कल्पयित्वा पुराणगार्हपत्य आज्यं विलाप्योस्रुय समन्वारब्धेषु ऋत्विक्षु संप्रे
छन्नेषु॰ अध्वर्युर्यजमानस्तं पत्नी तां पुत्रान्पौत्रा ज्ञातयश्चेति ज्येष्ठानुक्रमेण॰ प्रचरण्यां
चतुर्गृहीत्वा शालामुखीये जुहोति। त्वꣳ सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्य उरुयन्ता
सि वरूथꣳ स्वाहा॰ सोमायेदं। स्रुवेणाप्तुं जुहोति। जुषाणो अप्तुराज्यस्य वेतु स्वा
हा॰ अग्नय इदं। पुनश्चतुर्गृहीतं गृहीत्वा संप्रैषमाह॰ अग्नीषोमाभ्यां प्रणीयमानाभ्यां
मनुब्रूहि। प्रथमायां त्रिरुक्तायां इध्ममुद्यम्य पूर्वया द्वारोपनिष्क्रामंति॰ आन्वग्राग्ना
चाज्ये आन्वंग्राव्णो वायव्यानि अयं नो अग्निर्वरिवः कृणोत्वयं मृधः पुर एतु प्रभिंद
न्। अयं शत्रूञ्जयतु जर्हृषाणोऽयं वाजं जयतु वाजसातौ। उत्तरेणासदः परिश्रित्याग्नीध्राग
ग्रे निधाय परिस्तीर्य परिषिच्य चतुर्गृहीतेनाभिजुहोति॰ अग्ने नय सुपथा राये अ
स्मान्विश्वानि देव वयुनानि विद्वान्। युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं

वि

(margin: स्ता, कृ, ग्निं)

।।२८।।

पा

विधेम स्वाहा। अग्न यद्दं। अग्नेर्वैस्त द्रावणो वायव्यं समुपसाद्यो त्तरेणाग्नीध्रीयं
धिष्ण्यं राजानं चाग्र्यं अंगात्वा। आहवनीये स्रुवाहुतिं जुहोति उरु विष्णो। ब्रह्मा राजा
नमन्यस्मै प्रदाय मंत्रेणोप विशति। यजमानश्च स्वायतने। अध्वर्युः प्रोक्षणी
रुन्नहयं निधाय दियन्मइयं तं पशुवत् स्वरे प्रोक्षणादीनि। महावेदिं श्रोण्यां प्रोक्षणी
र्निनयति। ब्रह्मा यथागतमादाय राजानमादत्ते। यजमानः अपत्नपस्य यथेत
मेव ब्रह्मणो राजानमादाय पूर्वया द्वारा हविर्धाने प्रपादयति। सोमो जिगाति
गातुविद्देवानामेति निष्कृतमृतस्य योनिमासदं। अध्वर्युः अपत्नपस्य यदक्
क्षिणास्य हविर्धानस्य नीडे कृष्णाजिनमास्तृणाति। अदित्याः सदोसि। यज। कृ
ष्णाजिने राजानं। आदित्याः सद आसीद। राजानं देवताभ्यः प्रयछति। एष वो देव
सवितः सोमस्तं रक्षध्वं मा वो दभत्। उपतिष्ठते। एतत्वं सोम देवो देवानुपागा इ
दमहं मनुष्यो मनुष्यान्त्सह प्रजया सह रायस्पोषेण। उपरि प्रांच्यामंजलिं करोति।
नमो देवेभ्यः। दक्षिणा तोन्यं च। स्वधा पितृभ्यः अपत्नपस्य। इदमहं निर्वरुण
स्य पाशात्। उपनिष्क्रम्य। सुवरभिविख्येषं वैश्वानरं ज्योतिः। आहवनीयमुपतिष्ठ
ति अध्वर्युः अवांतरदीक्षां विसृजति। यजमानः। अग्ने व्रतपते त्वं व्रतानां व्रतपति

॥३८॥

रसियाममतनूस्वय्यभ्रदियः सामयिया। तवतनूर्मय्यभूदेषासात्वयियथाय
थनोव्रतपतेव्रतिनोर्व्रतानि। आहवनीयमुपस्थापय। अध्वर्यु। त्वस्तीषुमिखलाप्रसु
त्रीसास्ययजमानइतिस्वाचक्षतांनः मआहतेपितृभिः पितामहैः प्रपितामहैः पु
त्रैः पौत्रैः सुब्रह्मण्यसुब्रह्मण्यामाह्वयतु। वपायामोतेसुब्रह्मण्यः पितापुत्रीयाङ्को
नंकरोति। पूपाहस्यादियूपावटं तमत्रेववा। यान्वतीयवमतीरित्यादियूपप्रक्षालना
दिवपामार्जनांतंपशुवत्। अग्नीषोमाभ्यांत्वाजुष्टमुपाकरोति। अग्नीषोमाभ्यांत्वा
जुष्टंप्रोक्षामि। अग्नीषोमाभ्यांछागस्यवपायामेदसोवदीयमानस्यानुब्रूहि। अ
ग्नीषोमाभ्यांछागस्यवपांमेदः प्रस्थितंप्रेष्य। इद्रियावन्तुमांत्रिपांमार्जनांतेपिता
पुत्रीयामाहुतायांदद्वकुंभमादायांतरेणचात्वालोत्करावुदङ्पनिष्क्रम्यवसति
वरीरपः प्रतिस्रोतंसंस्थित्वाछायातपयोः संयोगेगृह्णाति। हविष्मतीरिमा आपो
हविष्मांदेवो अध्वरोहविष्माः। आविवासतिहविष्मांअस्तुसूर्यः। आस्तमिति
हिरण्यंनिधायगृह्णाति। आछायायांवृक्षछायायांस्वदेहछायायांवा। प्रदक्षि
णमावृत्यसव्यंसेनिधायांतरेणचात्वालोत्करावुत्तरेणाग्नीध्रीयंसदश्चगत्वा। पूर्वया
द्वाराशालांप्रपाद्यशालामुखीयस्यपश्चात्संस्पृष्टाः सादयति। अग्नेर्वोपन्नगृ ॥३८॥

(77)

दक्षिणया द्वारोपनिष्क्रम्य सव्ये ंसे निधाय दक्षिणेन मार्जालीयं सदश्च परीत्य होतोदंमुखो द

पुरो

स्य सदसि सादयाति सुम्नाय सुम्निनीः सुम्ने मा धत्त । आग्नीध्रे पुरोडाशान् निधाया दि-
स्वरुहोम वर्जमाज्येडान्ते पशुवत् । आग्नीध्रीयादीप यजमानाहरणं । आज्येडामार्जनां
तः संतिष्ठते । अग्नीषोमाभ्यां पुरोडाशस्यैता व्यूहः । वत्रे हति पुरोडाशस्यैव इन्द्रियाय्यंगा
नां वल्लरवल्ले मुसल इति वा ध्रुवाप्यायनादि प्रायश्चित्तान्निहृत्वा संतिष्ठते गनीषो
मीयः । हृदयशूलं प्रक्षाल्य स्थापयित्वा । व्यपक्रामत मा वो भिपरिहरिषं । सर्वे बहिर्नय
ति । वसतीवरीरादाय जघनेन गार्हपत्यं नीत्वा दक्षिणातो यूपेन संस्पृष्टाः सादयति
इन्द्राग्नियोर्भागधेयी स्थ । पुनरादायोदङ् स्य दक्षिणे ंसे निधाय यथेतमेत्य शाला
मुखीयस्य पश्चात् संस्पृष्टाः सादयति । मित्रावरुणयोर्भागधेयी स्थ पुनरादाय दक्षिणे ंसे
निधाय पूर्वया द्वारा निष्क्रम्योत्तरेणा सद आग्नीध्रीयं परीत्योत्तरेतो यूपेन संस्पृष्टाः
सादयति । विश्वेषां देवानां भागधेयी स्थ । पुनरादाय सव्ये ंसे निधायाग्नीध्रीयस्य प
श्चात् सादयति । युष्मे जागृत । अथ संप्रेष्यति । यासंम्राड् धुक्त स्ये दधि घर्मो यद्दधि कुरु
त याय जमानस्य तस्या आमिक्षायेया पत्न्यै तस्या आशिरं पयस्य सक्तून् कुरुत श्वेतं
तक्यमादिय प्रहार्यं कुरुत पुरोडाशीया निपिष्ट निकुरुत धाना हारियोजनीः कुरुत
त चतुरोञ्जपाणांस्त्रीनुदचना नयुज एक घनांस्य वमानेकादशापरामान्हरता नेद्वपाश्र
पणीः कतयामि ध्मा बर्हिरौदुम्बरान्महान्परिधीन्कुरुत सुब्रह्मण्य सुब्रह्मण्यामाव्हय

हुत्वा

प्रदक्षिणमा
वृत्य यथे
तमेत्य

स्पृष्टाः

दधि

॥३८॥

तुश्चाध्वर्युपुरुषेष्वन्यतमः सवनीयातिरिक्तानां शाखानां क्रमेणापर्णा बिछित्वाग्रेण शाला
मुखीयं निधाय मूलतः परिवास्योपवेषान्स्त्वाला जघनेन शालामुखीयं निधाय द्विती
यमयं चसमं त्रमन्यानितस्त्रीषट् शाखापवित्राणि कृत्वोत्तरेण गार्हपत्यं षट् दोहना
निता वंत्ति शाखापवित्राणि अथैतस्थाली असादयित्वा मंत्रेण प्रोक्ष्य तत्तदुपवेषेणांगा
रान्निरुह्य तत्तत्स्थाल्यां ततत्पवित्रं निधाय तेन तेन दोहनेन दोहयित्वा तत्स्वोद् गुह्यास्यातन ने
किबाभ्यां तननक्ति द्वितीयरैंद्रः षष्ठी मैत्रावरुणाः मित्रावरुणोरमयतां गावः। मित्रा
वरुणाभ्यां दूह विरिंद्रियं। बहुदुग्धि मित्रावरुणाभ्यां इव्यमाप्यायतां सामान
मन्यत्। तत्तदुपवेषांघ्याखापवित्राणि मेक्षणानि दोहानग्नेःशालानि निधाय प्रातर्दो
हस्थाल्योस्थापयति। दर्भैः प्रातर्दोहाय वत्सानपाकृस्य सवनीयपशु शाखापूर्व
मान्नाहृताचेदिदानीं तां प्लक्ष शाखां चाहृत्वा सिदादानादि एकविधं बर्हिराश्च बा
लं प्रस्तरं रेक्षवी विधृती औदुंबरे र्महापरिधिभिस्तत स्वांत्रयो विंशति धापरि
भोजनीयान्वेदंच स्वायजमानः सुब्रह्मण्यायामाहूतायां पशुदेवतामग्निं
वनस्पत्यादिं च संकल्प्य सवनदेवताः संकल्पयति। इंद्रो वसुमान्प्रातः सवन ॥३८॥
स्य देवता। इंद्रो रुद्रवान्माध्यंदिनस्य। इंद्र आदित्यवान् ऋभुमान्विभुमान्वाजवान्बृ

२ याः पुरस्ता०। निदिष्टं। ज्योतिष्टो० सवनीयपशुनायक्ष्येऽज० ११ पशुकं हविः अग्निः प्रधानदेवता ४ वनस्पतिष्टा सविता वा २
षष्ठ० अग्निः स्विष्टकृदित्यादि।

79

हस्पतिवान्विश्वेदेव्यावांस्तृतीयसवनस्येत्यादि। अध्वर्युरंत्रयानायालय
ति। उत्तरस्यहविर्धानस्यनीडे आयवनीये प्रठंगोपूतभृतं। तयोः समानुं
दचनः। आग्नीध्रएकं सोदचनं। मार्जालीयेएकं सोदचनं। आग्नीध्रएतांरा
त्रिंयजमानः संविशंति। हविर्धानेराजानंगोपायंति।। इति द्वितीः प्रश्नः।।
त्रिभागावशेषायांरात्र्यांयजमानस्तत्पुरुषाश्चप्रबुध्याध्वर्य्वादीनृत्विजश्च
मसाध्वर्यून्पत्नीमन्याश्चपरिकर्मिणोबोधयंति। नमहारात्रेस्नानंकुर्वंति। यज
मानोहस्तपादौप्रक्षाल्याचम्यांतरेणचात्वालोत्करौप्रविश्याग्नीध्रीय
आस्ते। ऋत्विजोहस्तपादान्प्रक्षाल्याचम्यतीर्थेनप्रविश्ययजमानमुपसं
गच्छते। अध्वर्युरग्नीषोमीयवत्पशुशाखायाः पवित्रादिकुंभ्यादीनांप्रो
क्षणांतंकृत्वा·ग्नीध्रधिष्ण्यस्यान्तरतस्तिष्ठन्स्तोसंमन्त्राति। कर्मणावांदे
वेभ्यस्माकेयं। अत्रैवतिष्ठन्संप्रेषमाह। तन्त्रेतराग्रीण्णोवायव्यानिद्रोणाक
लशौदशापवित्रसमवधायदक्षिणस्यहविर्धानस्यपुरोक्षः संसादयत्या
ग्नीदाज्यमधिश्रयप्रतिप्रस्थातः स्रुचंसंमयाज्येनोदेहिपृषदाज्यदध्या

१

यवन्मथिता आयतनान्युद्धृत्यावोक्ष्याग्नीन् विहृत्य परिस्तीर्य परिषिंच्य ॥ दर्पयो
स्मार्त्तवदाज्यं संस्कृत्य स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये मनस्वतीं जुहोति पुनर्विहृत्याे

होतृ ध्वर्युर्भ्रमाग्निष्ठयजमाना यथायतनं पूर्ववत्त्र्यंगाति जपंति ॥ नमो वाचे याचोदिताया
चानुदिताया वाचानुदिता तस्यै वाचे नमो नमो वाचे नमो वाचस्पतये नम ऋषिभ्यो म
त्रकृद्भ्यो मंत्रपतिभ्यो मामामृषयो मंत्रकृतो मंत्रपतयः परादुर्माहमृषीन् मंत्रकृतो मंत्र
पतीन् परादां वैश्वदेवीं वाचमुद्यासं शिवामदस्तां जुष्टां देवेभ्यः शर्म मे द्यौः शर्म पृ
थिवी शर्म विश्वमिदं जगत् ॥ शर्म चंद्रश्च सूर्यश्च शर्म ब्रह्मप्रजापती ॥ भूतं वदिष्ये
भुवनं वदिष्ये तेजो वदिष्ये यशो वदिष्ये तपो वदिष्ये ब्रह्म वदिष्ये सत्यं वदिष्ये तस्मा अह
मिदमुपस्तरणमुपस्तृण उपस्तरणं मे प्रजायै पशूनां भूयादुपस्तरणमहं प्रजायै पशू
नां भूयासं प्राणापानौ मृत्योर्मा पातं प्राणापानौ मा मा हासिष्टं मधुमद्विष्ये मधु जा
निष्ये मधु वक्ष्यामि मधुवदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासं शुश्रूषेण्याम्
नुष्येभ्यस्तं मा देवा अवंतु शोभायै पितरोनुमदंतु ॐ शांतिः शांतिः ॥ अध्वर्युः अ
ग्रेण शालां यजुर्मात्रं गर्तं खात्वा भावितयामदाभिपूर्यं तदुत्तरतः स्फ्योपधं दंब नि

शांतिः ॥

पूर्णा पश्चादुत पूर्णा पुरस्तादुन्मध्यतः पौर्णमासी जिगाय । तस्यां देवा अधि संवसंत उत्तमे नाक इह मादयं-
तामग्नीषोमौ प्रथमौ वीर्येण वसून्रुद्रानादित्यानिह जिन्वतं ॥ माध्यꣳ हि पौर्णमासं जुषेथां ब्रह्मणा वृधौ सु-
कृतेन सातावथास्मभ्यꣳ सहवीराꣳ रयिं नियच्छतं स्वाहा ॥ पूर्णमासोयं दे ॥ निवेशनी संगमनी वसूनां
विश्वा रूपाणि वसून्यावेशयंती । सहस्रपोषꣳ सुभगा रराणा सा न आगन्वर्चसा संविदाना यत्ते देवा अद-
धुर्भागधेयममावास्ये संवसंतो महित्वा । सा नो यज्ञं पिपृहि विश्ववारे रयिं नो धेहि सुभगे सुवीरꣳ स्वा-
हा ॥ अमावास्यायादं ॥

(5)

[OrderDescription]
,CREATED=30.09.20 11:13
,TRANSFERRED=2020/09/30 at 11:25:48
,PAGES=80
,TYPE=STD
,NAME=S0003775
,Book Name=M-1109-AGNIHOSTAM PRAYOG
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,